Postal Regd.No. GAMC- 1553/2025-2027 ISSN 2454-6313

संस्कृत-
# साम्प्रतम्
(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : १९ अङ्क : २२७
मार्च - २०२५

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2025-2027 issued by SSP Ahmedabad. Valid upto 31-12-2027. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### आत्मदीपस्य प्रज्वालनम्



हेन्री–फ्रोडनामकः विचारकः बाणतुल्यं वाक्यं क्षिप्तवान् । सः लिखति – 'यः चिन्तयितुं न शक्नोति सः शिक्षितः न उच्यते, तस्य हस्ते प्रमाणपत्राणि (Degree Certificates) विद्यन्ते चेदपि !' कथनं सत्यमेव । अस्माकं दुर्भाग्यं तु प्रतिक्षणम् अधोगतिं प्राप्नोति।

राजनेतारः अशिक्षिताः वर्तन्ते एव, परं तेषु शिक्षणमन्त्रिणः अपि अशिक्षितानां शिखरे विराजन्ते । शिक्षणस्य स्थितिः गतिः च उभयं दयनीयं विद्यते । परन्तु उपायः कः ? स्वशिक्षणं प्रति जागरणम् । प्रत्येकं मनुष्यः चिन्तयेत् यत् मया स्वयं शिक्षितेन भवितव्यम् । तदर्थं तेन आयामाः अन्वेष्टव्याः । इतरेषां विवेचने तस्य रुचिः न भवेत् । आत्मदीपस्य प्रज्वालने प्रीतिः भवेत् ।


वैदेशिकेषु जनेषु कश्चित् गुणः दृश्यते । ते जनाः परनिन्दां विस्मृत्य आत्मविकासं प्रति विशेषतः चिन्तयन्ति। भवन्तः वदिष्यन्ति – 'ते तु भौतिकं विकासं पुरस्कृत्य धावन्ति ।' तथा न चिन्तनीयम् । वयं भारतीयाः, न आध्यात्मिकीं प्रगतिं कुर्मः, न च भौतिकीम् । उभयभ्रष्टाः वयं परनिन्दां कुर्वाणाः, विकासस्य शीर्षासनेन आत्मानं प्रसादयामः ।

भवन्तः पुनः तर्कयिष्यन्ति यत् 'भारते आध्यात्मिकः विकासः न इति कथं वक्तुं शक्यते ? अत्र अस्माकं शास्त्राणि प्रमाणम् ।' तदपि अनुचितम् । अद्य वयं तपोनिष्ठानां पूर्वजानां पुण्येन गौरवम् अनुभवामः । गौरवं निन्दनीयं नैव, परन्तु नितरां तद् गौरवं पुरस्कृत्य क्रियमाणम् आत्मरक्षणं क्लेशं जनयति।

'अस्माकं पिता बुद्धिमान् आसीत्' इति सगौरवं घोषयन्तः मूर्खाः पुत्राः समाजे बहुमानं लभन्ते ? वृथा गौरवं बहुत्र हास्यास्पदं भवति।

## याचना

– **जातककथा**



प्राचीने काले राजा ब्रह्मदत्तः काशीनगरं परिपालयति स्म। तेषु दिनेषु बोधिसत्त्वः कस्मिंश्चित् ग्रामे ब्राह्मणकुले जन्म प्राप्तवान्। तस्य नाम आसीत् सोमदत्तः इति। तस्य पिता नितरां निर्धनः आसीत्। अल्पे कृषिक्षेत्रे श्रमेण कार्यं कुर्वन् कथञ्चित् कुटुम्बजनान् पोषयति स्म सः।

प्राप्तवयस्कतां गतः सोमदत्तः पितुः परिश्रमपूर्णं जीवनं दृष्ट्वा नितरां खिन्नः जातः। सः मातापितरौ सुखिनौ कर्तुं कञ्चित् उपायं चिन्तितवान्।

'मया कथमपि विद्याभ्यासं कृत्वा गृहजनानां साहाय्यं करणीयम्। कृषौ पितुः साहाय्यकरणं शक्यम्। किन्तु तेन महान् आयः न प्राप्येत। ततः दारिद्र्यस्थितेः परिवर्तनं क्लेशाय एव। तस्मात् विद्याभ्यासः एव उत्तमः परिहारः' इति चिन्तयित्वा सः पितरम् अवदत् – ''तात! अहं तक्षशिलां गत्वा विद्याभ्यासं कर्तुम् इच्छामि'' इति।

पिता एतत् अनुमतवान्। अनन्तरं सोमदत्तः तक्षशिलां गतवान्। गुरुशुश्रूषां कृत्वा सः कस्माच्चित् आचार्यात् विद्याम् अधिगृहीतवान्। विद्याभ्यासं समाप्य गृहं प्रत्यागतवान् अपि सः।

पिता तु यथापूर्वं वृषभयोः साहाय्येन कृषिकार्यं निर्वहन् आसीत्। इतःपरम् अपि विलम्बः न करणीयः इति विचिन्त्य सोमदत्तः काशीं गतवान्, राज्ञः आस्थाने कञ्चित् उद्योगं प्राप्तवान् च।

कानिचन दिनानि अतीतानि। अत्रान्तरे सोमदत्तस्य पितुः कश्चन वृषभः दिवं गतः। यः बहूनि वर्षाणि कृषिकार्ये साहाय्यं कृतवान् सः एव वृषभः दिवं गतः इत्यतः सोमदत्तस्य पिता हस्तभङ्गं प्राप्तवान् इव। कृषिं विना तु जीवनम् असाध्यम् आसीत्।

'मम पुत्रः राजास्थाने उद्योगी अस्ति। अतः सः राजानम् उक्त्वा मह्यम् एकं वृषभं दापयेत् अपि' इति विचिन्त्य सोमदत्तस्य पिता काशीं गतवान्।

पितुः मुखात् सर्वं श्रुत्वा सोमदत्तः अवदत् –''तात! भवान् माता च वृद्धौ जातौ। इतःपरम् अपि अल्पायां भूमौ कृष्या किम्? भवन्तौ उभौ अपि अत्र आगत्य मया सह सुखेन निवसताम्'' इति।

एतत् श्रुत्वा पिता अवदत् – ''ग्रामं त्यक्त्वा अत्र आगन्तुम् अहं न इच्छामि। भवान् एकं वृषभं दापयतु। तेन अहम् आनन्देन ग्रामे कृषिं कुर्वन् दिनानि यापयिष्यामि। ग्रामे मया या शान्तिः तृप्तिः च प्राप्यते सा अन्यत्र न प्राप्येत'' इति। सोमदत्तः तु सद्यः एव राजास्थाने उद्योगं प्राप्तवान् आसीत्। सः उद्योगः अपि सामान्यः एव। अतः वृषभक्रयणाय यावत् आवश्यकं तावत् धनं न आसीत् तस्मिन्। सः राजानं याचितुम् अपि न इच्छति स्म।

'उद्योगप्राप्तिसमनन्तरम् एव धनस्य याचनम् उचितं न' इति चिन्तयन् सः पितरम् अवदत् – "अहं यदि राजानं वृषभं याचेयं तर्हि सः मां पृच्छेत् यत् राजोद्योगिने भवते इदानीं वृषभस्य का आवश्यकता इति। अन्यच्च सद्यः एव उद्योगं प्राप्तवान् अहं याचनां करोमि चेत् तत् उचितं न भवेत् अपि। अतः मम तु भाति यत् भवान् एव राजानं याचति चेत् वरम् इति। भवान् राजानं दृष्ट्वा वस्तुस्थितिं निवेद्य वृषभं याचतु। सः भवते अवश्यं वृषभं दद्यात् एव" इति।

किन्तु सोमदत्तस्य पित्रे एषः प्रस्तावः न अरोचत। सः पुत्रम् अवदत् – "वत्स ! अहं तु कश्चन अशिक्षितः ग्रामीणः। हलचालनात् ऋते अहं किमपि न जानामि। क्व राजा, क्व राजास्थानं, क्व च अहम् ! कथञ्चित् राजास्थानं प्रविशेयं चेदपि मम मुखात् तत्र किमपि न निर्गच्छेत्। राज्ञः पुरतः कथं व्यवहरणीयम् इत्यपि अहं सर्वथा न जानामि। अतः भवान् एव एतत् कार्यं करोतु" इति।

"तात ! अलं चिन्तया। अहम् एकं श्लोकं लिखित्वा ददामि भवते। द्वित्राणि दिनानि तं भवान् कण्ठस्थं करोतु। ततः राजास्थानं गत्वा तमेव श्रावयतु। ततः इष्टं सिद्धं भविष्यति" इति वदन् सोमदत्तः पितरि धैर्यं पूरितवान्।

एतदनन्तरं सः कञ्चित् श्लोकं रचयित्वा पित्रे दत्तवान्। पिता तं कण्ठस्थं कृतवान्। स च एवम् –

**द्वौ मे गावौ महाराज करोमि स्म कृषिं ततः।**
**तयोरेको मृतो देव द्वितीयं देहि मे नृप ॥**

वृद्धः महता श्रमेण एतं श्लोकं कण्ठस्थीकृतवान्। ततः सोमदत्तः तं राजास्थानं नीतवान्।

वृद्धः पुत्रस्य सूचनानुगुणं राजानं मन्त्रिणः च नमस्कृत्य तूष्णीं स्थितवान्।

"कः भवान् ? किम् इष्यते भवता ?" इति अपृच्छत् राजा।

वृद्धः आत्मना कण्ठस्थीकृतं श्लोकं तत्र श्रावितवान्। किन्तु महत्याः भीतेः कारणतः श्लोकोच्चारणसमये अल्पः प्रमादः जातः। सः श्लोकम् उच्चारितवान् इत्थम् –

**द्वौ मे गावौ महाराज करोमि स्म कृषिं ततः।**
**तयोरेको मृतो देव द्वितीयं विन्द मे नृप ॥** इति

एतं श्लोकं श्रुत्वा आस्थानिकाः सर्वे हसितवन्तः। सोमदत्तः लज्जया शिरः अवनमय्य स्थितवान्। यतः तदीयेन पित्रा 'मह्यम् एकः वृषभः दीयताम्' इति प्रार्थनीयम् आसीत्। किन्तु सः उक्तवान् आसीत् यत् द्वितीयं स्वीकुरु इति। एतत् श्रुत्वा राजा हसन् पृष्टवान् – "किं तं द्वितीयं वृषभं दातुम् एव भवान् स्वगृहात् एतावद्दूरम् आगतवान् ?" इति। "महाराज ! वस्तुतः मम आगमनं तेन उद्देशेन न आसीत्, तथापि इदानीं तु भाति यत् तं वृषभं भवान् स्वीकरोति चेदेव वरम् इति। तस्य कारणतः एव एतत्सर्वं जायमानम् अस्ति" इति वदन् वृद्धः प्रवृत्तं सर्वं श्रावितवान्।

सोमदत्तस्य नीतिपूर्णं व्यवहारं दृष्ट्वा राजा नितरां सन्तुष्टः। अन्ये आस्थानिकाः कथमपि अवसरं प्राप्य राजानं किमपि किमपि याचन्तः भवन्ति स्म। किन्तु सोमदत्तेन एवं न कृतम् आसीत्।

अतः सन्तुष्टः राजा अष्टौ वृषभयुगलानि अलङ्कृत्य सोमदत्तस्य पित्रे दत्त्वा तं तृप्तं कृत्वा प्रेषितवान्।

## स्वप्नवासदत्तम् ( ग्रन्थपरिचयः )

✍ व्योम शाहः



यस्य कवेः कृतितारकेषु समुदितेषु अन्येषां कवीनां कृतयः ग्रहाः इव प्रतिभासन्ते, तस्य महाकवेः भासस्य नाट्यचक्राद् अपूर्वस्य 'स्वप्नवासदत्तम्' इत्याभिधस्य नाटकस्य रसनास्वादनं कुर्मः।

**कृतिप्रकारः** – अविमारक–प्रतिमा–आदिवद् इयमपि कृतिः 'नाटकम्' इति रूपकप्रकारे अन्तर्भवति । बृहत्कथायाः उद्घृतवात् ख्यातवृत्तमेतत्। अत्र नायकः उदयनः धीरललितः। अत्र मुख्यः रसः शृङ्गारः करुणः च।

**कृतेः आधारसामग्री** –इदं नाटकं गुणाढ्यविरचितं बृहत्कथाम् आधारीकृत्य रचितम्। अद्य सा कृतिः नोपलभ्यते किन्तु तदुपजीविनः बृहत्कथामञ्जरी–कथासरित्सागरादिग्रन्थाः समुपलभ्यन्ते येन मुख्यग्रन्थस्य कथावस्तु ज्ञातुं शक्यते।

**कृतेः अभिधानम्** – पञ्चमाङ्के अर्धजागरितावस्थायाम् उदयनेन दृष्टं वासवदत्तायाः स्वप्नम् अधिकृत्य अस्य नाटकस्य नाम स्वप्नवासवदत्तम्। स्वप्ननाटकम्, स्वप्नवासवदत्ता च अस्य एव अपरे नामनी। ''स्वप्नदृष्टा वासवदत्ता अत्र इति'' केचित् – 'स्वप्नश्च वासवदत्ता च इति स्वप्नवासवदत्तम्' इति विग्रहम् अनुसरन्ति।

**नाटके पात्राणि** – उदयनः, यौगन्धरायणः, वसन्तकः (विदूषकः) वासवदत्ता, पद्मावती, तापसी, चेटी च प्रधानानि पात्राणि।

**नाटकसारः** – नान्द्यन्ते सूत्रधारः प्रविश्य मङ्गलं करोति–

**उदयनवेन्दुसुवर्णावासवदत्तबलौ बलस्य त्वाम्।**
**पद्मावतीर्णपूर्णौ वसन्तक्रमौ भुजौ पाताम्॥**

**पूर्वपीठिका** – उदयनः राजभारं विस्मृत्य वासवदत्तया सह विविधान् भोगान् भुनक्ति। अथ कदाचिद् आरुणिनामा नृपः वत्सराज्यम् आक्रम्य तस्य एकदेशे अधिकारं प्राप्तवान्। उदयनस्य मन्त्री यौगन्धरायणः राज्यरक्षणार्थं मगधराजस्य एव साहाय्यं हितकरं विज्ञाय तस्य भगिन्या सह उदयनस्य विवाहः इति एकम् एव विकल्पं पश्यति स्म। वासवदत्तायाम् अनुरक्तः उदयनः अन्यस्यां युवत्यां न स्निह्येत् मगधराजः च परिणीतेन राज्ञा सह स्वभगिनीं न परिणाययेत्।

यौगन्धरायणः अत्र वासवदत्तायाः साहाय्येन एकम् आयोजनम् अकरोत्। सः उदयनं लावाणकं प्रति प्रेषितवान् स्वयं च वासवदत्तया साकं प्रच्छन्नवेषः सन् वत्सदेशाद् विनिर्गतः। तत्र नगरे तेन प्रवादः प्रसारितः यत् तौ आयतनदाहे दग्धौ मृतौ च। नाटकस्य प्रारम्भः मगधदेशस्य राजगृहनगराद् अदूरस्थिताद् आश्रमाद् भवति यत्र यौगन्धरायणः ब्राह्मणवेषधारी वासवदत्ता च तस्य भगिनी प्रच्छन्नवेषधारिणी।

(क्रमशः...)

# मासवार्त्ता:

## सम्पन्नः पञ्चदशः पदवीदानसमारम्भः

























एकलव्य–संस्कृत–एकेडेमीसंस्थानस्य पञ्चदशः पदवीदानसमारम्भः फरवरीमासस्य १५ दिनाङ्के सम्पन्नः। समारम्भेऽस्मिन् 'डिप्लोमा–इन–संस्कृतटिचिंग' इति अभ्यासक्रमे प्रशिक्षितेभ्यः डॉ. योगानन्दशास्त्रिमहोदयस्य करकमलाभ्यां पदवीप्रदानम् अभवत्। अभ्यासक्रमोऽयं श्रीसोमनाथ–संस्कृत–विश्वविद्यालयेन सह संलग्नः वर्तते। कार्यक्रमेस्मिन् डॉ. भाविन् पाठकः (उपाचार्यः, त्रिपदा–इण्टरनेशनल–स्कूल) विशेषोपस्थितिं प्रायच्छत्। प्रसङ्गेस्मिन् एकलव्य–संस्कृत–एकेडेमीसंस्थाने आयोजितेषु विविधेषु अभ्यासक्रमेषु संस्कृतस्य अध्ययनं कृतवद्भ्यः छात्रेभ्यः अपि प्रमाणपत्रप्रदानम् अभवत्। प्रमाणपत्रं प्राप्य सर्वे छात्राः आनन्दिताः आसन्।

## कृपया हसन्तु

रमण: - (नमनम् उद्दिश्य) भो: महती समस्या सञ्जाता ।

नमन: - किम् अभवत् ?

रमण: - मया मम नूतनं युतकम् एतेन फेनकेन प्रक्षालितम् । प्रक्षालनानन्तरं तत् लघु अभवत् । अहम् एतत् युतकं धर्तुमेव न शक्नोमि ।

नमन: - भो:, एकं कार्यं कुरु । त्वमपि तेन एव फेनकेन स्नानं कुरु । स्नानानन्तरं तत् युतकं तव धारणयोग्यं भविष्यति ।

युतकम् - shirt , फेनकम् - soap

★ ★ ★ ★ ★

वैद्य: - (नमनं प्रति) शस्त्रक्रियानन्तरं भवान् भवत: गृहं प्रति चलित्वा गन्तुं शक्ष्यति ।

नमन: - भो:, एतस्या: शस्त्रक्रियाया: मूल्यं तावत् अधिकं अस्ति यत् मम समीपे रीक्षायानेन गन्तुम् अपि धनं न भविष्यति ?

★ ★ ★ ★ ★

वैद्य: - भवान् किं फेनकम् उपयुङ्क्ते ?

नमन: - गगनस्य नीमतैलयुक्तं फेनकम् ।

वैद्य: - केशप्रक्षालनाय किं संवहनं उपयुङ्क्ते ?

नमन: - गगनस्य प्राकृतिकं संवहनम् ।

वैद्य: - तैलम् ?

नमन: - गगनस्य आमलकतैलम् ।

वैद्य: - अयं गगन: इति फेनकादीनां कश्चन नूतन: निर्माता वर्तते वा ?

नमन: - न, न महोदय ! गगन: मम सहकक्षनिवासि मित्रम् वर्तते ।

संवहनम् - shampoo

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**योगक्षेमाय धर्मस्य सभ्यताया: सुसंस्कृते: ।**
**नैवान्यो विद्यते पन्था लोकसङ्घटनं विना ॥**

**तात्पर्यम्** – धर्मस्य सभ्यताया: संस्कृते: च रक्षणाय जनानां सङ्घटनं विना अन्य: मार्ग: न विद्यते।

**यौवनं धनसम्पत्ति: प्रभुत्वमविवेकिता ।**
**एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ॥**

**तात्पर्यम्** – तारुण्यं, सम्पत्ति:, अधिकार:, अविवेकिता – एतेषु एकैक: अपि अनर्थाय भवति। एते चत्वार: अपि एकस्मिन् जने यदि भवेयु: तर्हि तस्य का गति: ?

**रत्नैर्महार्हैस्तुतुषुर्न देवा न भेजिरे भीमविषेण भीतिम् ।**
**सुधां विना न प्रययुर्विरामं न निश्चितार्थाद्विरमन्ति धीरा: ॥**

**तात्पर्यम्** – समुद्रमथनकाले देवा: प्रभूतरत्नराशि: प्राप्तश्चेदपि न सन्तुष्टा: । भयङ्करविषस्य उद्भवेऽपि न भीता: । अमृतप्राप्तिपर्यन्तं स्वप्रयत्नम् अकुर्वन् । एवं धीरा: निश्चितफलप्राप्तिपर्यन्तं प्रयत्नं न त्यजन्ति, प्रयत्नरता एव भवन्ति।

## ज्ञानसरित्

श्यामः पटेलः



**किं नाम पर्यावरणम् ?** – अस्माकं पर्यावरणं भृशं प्रदूषितं जातमस्ति, तस्य संरक्षणं कर्तव्यं, तस्य शुद्धीकरणम् अपेक्षितम् इत्यादयः सर्वत्र श्रूयन्ते । किन्तु किं नाम पर्यावरणम् ? पर्यावरणे किं किं समाविष्टं भवति ? इत्यादि अस्माभिः प्रथमं ज्ञातव्यम् । ब्रह्माण्डेऽस्मिन् केवलं पृथिव्यामेव वायुः (वातः), जलं, मृत्तिका (मृत्) तथा च प्राणिसृष्टिः अस्ति । पृथिव्याः त्रीणि आवरणानि सन्ति जलावरणम्, मृदावरणम्, वातावरणम् च । एतानि त्रीणि मिलित्वा रचयति पर्यावरणम् ।

जलावरणे समुद्राः, नदाः, नद्यः, तडागाः, सरांसि, हिमशिखराश्च समाविष्टाः भवन्ति । वर्षा अस्माकं पृथिव्याः जलचक्रं सततं चालयन्ती अस्ति । द्वितीयमस्ति वातावरणं, तन्नाम वायवः । प्राणवायुना एव सर्वे श्वसन्ति । वनस्पतिना एव प्राणवायुः जायते । इदानीं तृतीयमस्ति मृदावरणम् अर्थात् मृत्तिका । पृथिव्याः बाह्यस्तराद् अधः ३३ किलोमीटरमितं यावत् भूमेः मृदुः स्तरः अस्ति । तस्मिन्नेव जन्तवः वसन्ति । तस्मादेव बीजानि वृक्षरूपेण जायन्ते । ततः एव कृषिः सम्भवति ।

किन्तु पृथिव्याः चतुर्थम् अपि आवरणम् अस्ति । तदस्ति जीवावरणम् । एतस्मिन् आवरणे मनुष्यतः आरभ्य समग्रप्राणिसृष्टिः समाविष्टा भवति । अतः यदा पर्यावरणसंरक्षणस्य कार्यं भवति तदा चतुर्णाम् आवरणानां शुद्धिः कर्तव्या । यावच्छक्यं तावत् पर्यावरणे न्यूनातिन्यूनं प्रदूषणं भवेत् तथैव अस्माभिः आचरणीयम् इत्यपि पर्यावरणसंरक्षणे अस्माकं महत् योगदानम् । एतदपि मनुष्याणां युगधर्मः अस्ति ।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **वातः** | पवन | air |
| **हुतभुग्** | अग्नि | fire |
| **प्रश्रयः** | आदर | respect |
| **प्रश्लेषः** | प्रश्लेष | close contact |
| **हव्यवाहनः** | अग्नि | fire |
| **हस्तिकम्** | हाथियों का समूह | multitude of elephants |
| **शुभ्रः** | शुक्ल | white |
| **शुल्बम्** | रज्जु | rope |
| **शून्यः** | रिक्त | empty |
| **शूर्पः** | छाज | winnowing basket |
| **शूलधन्वा** | शिव | shiv |
| **शूलधरा** | दुर्गा | durga |
| **पुस्तम्** | लेप करना | plastering |
| **पृच्छकः** | प्रष्टा | inquirer |
| **शृङ्गम्** | सिंग | summit of mountain |

## किं भवन्तः जानन्ति ?

**१ ) सिखसम्प्रदायस्य प्रसिद्धं तीर्थस्थलं स्वर्णमन्दिरं कुत्र वर्तते ?**
(क) अमृतसरे (ख) देहल्याम् (ग) जयपुरे (घ) अजमेरे

**२ ) प्रसिद्धं शीशगञ्जगुरुद्वारम् कस्मिन् नगरे वर्तते ?**
(क) पटनायाम् (ख) अमृतसरे (ग) लाहौरे (घ) देहल्याम्

**३ ) मुंशीप्रेमचन्दस्य जन्म कस्मिन् ग्रामे जातम् आसीत् ?**
(क) हसनपुरे (ख) लमह्याम् (ग) पचवरे (घ) चौकठायाम्

**४ ) मैथिलीशरणगुप्तस्य जन्म कस्मिन् ग्रामे जातः आसीत् ?**
(क) चिरग्रामे (ख) केवटपुरे (ग) तिलगोड्याम् (घ) सोनाईग्रामे

**५ ) कस्याः नद्याः जलम् अत्यन्तं पवित्रं मन्यते ?**
(क) चर्मण्वत्याः (ख) वितस्तायाः (ग) गङ्गायाः (घ) यमुनायाः

**६ ) अयोध्या कस्याः नद्याः तटे वर्तते ?**
(क) गङ्गायाः (ख) यमुनायाः (ग) सरयोः (घ) नर्मदायाः

**७ ) हरिद्वारं कस्याः नद्याः तटे वर्तते ?**
(क) ब्रह्मपुत्रस्य (ख) गङ्गायाः (ग) कावेर्याः (घ) यमुनायाः

उत्तराणि – (१) क (२) घ (३) ख (४) क (५) ग (६) ग (७) ख

# अस्माकम् आगामिकार्यक्रमाः

**"संस्कृतसाम्प्रतम्" मासिकस्य विषये पत्रक्रमाङ्कः ४ अनुगुणं विवरणम् ।**


१. प्रकाशनस्थानम् - "एकलव्य-संस्कृत-एकेडेमी"
कोर हाउस, ओफ सी. जी. रोड,
परिमलगार्डन-समीपम्, एलिसब्रिज,
अहमदाबादम् – ६.

२. प्रकाशनकालः - मासिकः

३. मुद्रकः प्रकाशकः - डो. मिहिरः उपाध्यायः
राष्ट्रियता - भारतीयः

४. सम्पादकः - डो. मिहिरः उपाध्यायः
राष्ट्रियता - भारतीयः
सङ्केतः - "एकलव्य-संस्कृत-एकेडेमी"
कोर हाउस, ओफ सी. जी. रोड,
परिमलगार्डन-समीपम्, एलिसब्रिज,
अहमदाबादम् – ६.

५. सदस्यनाम - डो. मिहिरः उपाध्यायः , सम्पादकः
सङ्केतः - "एकलव्य-संस्कृत-एकेडेमी"
कोर हाउस, ओफ सी. जी. रोड,
परिमलगार्डन-समीपम्, एलिसब्रिज,
अहमदाबादम् – ६.

अहं डो. मिहिरः उपाध्यायः घोषयामि यत् उपर्युक्ताः अंशाः नियमानुसारं योग्याः सन्ति।

दिनाङ्कः - 01/03/2025



## संस्कृत-साम्प्रतम्

नमस्कारः

यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

वार्षिकं रू – 100
द्वैवार्षिकं रू – 175
त्रैवार्षिकं रू – 250
अङ्कमूल्यं रू – 10

EKLAVYA SANSKRIT ACADEMY
जयतु संस्कृतं जयतु भारतम्

**Online / Offline**

**Admission Open**

# संस्कृतभाषाशिक्षणम्

## First Level

**Date :** 02/04/25 to 30/06/25
**Day :** Mon-Wed-Fri
**Time :** 6:30pm to 8:00pm
**Fees :** 6000/-

## Second Level

**Date :** 02/04/25 to 30/06/25
**Day :** Mon-Wed-Fri
**Time :** 7:00am to 8:30am
**Fees :** 6000/-

**Learn Online**

# स्तोत्रपाठः

**( निश्चितानि स्तोत्राणि )**

**Date :** 04/03/2025 to 18/03/2025
**Day :** Tuesday - Thursday
**Time :** 07:00 am to 8:30 am
**Fees :** Rs. 500/-

**contact: Dr Mihir Upadhyay, 98246 16237**


**प्रियवाचकाः**

- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**


EKLAVYA SANSKRIT ACADEMY
जयतु संस्कृतं जयतु भारतम्

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006